*[During term 3, during the translation of the following Gītā verses, the study and testing of the last two chapters of the Epic Civilisation should be completed.]*

# Bhagavad Gītā IGCSE Set Text, with Padāni

Chapter 1 v 1

धृतराष्ट्र उवाच।

***Dhṛtarāṣṭra said:***

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

धर्म-क्षेत्रे । कुरु-क्षेत्रे । समवेताः । युयुत्सवः।
मामकाः । पाण्डवाः । च । एव । किम् । अकुर्वत । सञ्जय ॥

'O Sañjaya, what did my people and the Pāṇḍavas do when they were joined, desirous of battle in the field of righteousness, in the battlefield of Kurukṣetra?'

Chapter 1 v 25

सञ्जय उवाच। ***Sañjaya said :***

भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान् समवेतान्कुरूनिति ॥

भीष्म-द्रोण-प्रमुखतः । सर्वेषाम् । च । महीक्षिताम् ।
उवाच । पार्थ । पश्य । एतान् । समवेतान् । कुरून् । इति ॥

Facing Bhīṣma and Droṇa and all the rulers of the earth, he* said, 'O Partha, behold all the Kurus gathered here together.'

*Hṛṣīkeśa

Chapter 1 v 26

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ।

तत्र । अपश्यत् । स्थितान् । पार्थः । पितॄन् । अथ । पितामहान्।
आचार्यान् । मातुलान् । भ्रातॄन् । पुत्रान् । पौत्रान् । सखीन् । तथा ॥
श्वशुरान् । सुहृदः । च । एव । सेनयोः । उभयोः । अपि ।

Standing there, Partha then saw in both the armies, fathers, grandfathers, teachers, maternal uncles, brothers, sons, grandsons, and friends, too; also fathers-in-law and benefactors.

Chapter 1 v 27

तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ।
कृपया परया ऽविष्टो विषीदन्निदमब्रवीत् ॥

तान् । समीक्ष्य । स । कौन्तेयः । सर्वान् । बन्धून् । अवस्थितान् ।
कृपया । परया । अविष्टः । विषीदन् । इदम् । अब्रवीत् ॥

He, the son of Kuntī, gazing at those kinsmen posted in positions spoke thus in sadness, filled as he was with choking compassion.

Chapter 1 v 28

अर्जुन उवाच ।

***Arjuna said***

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ।
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ॥

दृष्ट्वा । इमम् । स्वजनम् । कृष्ण । युयुत्सुम् । समुपस्थितम् ।
सीदन्ति । मम । गात्राणि । मुखम् । च । परिशुष्यति ॥

Seeing these my kinsmen, collected here, eager to fight, my limbs fail me, O Kṛṣṇa, and my mouth is parched.

Chapter 1 v 29

वेपथुश्च शरीरे मे रोमहर्षश्च जायते ।
गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ॥

वेपथुः । च । शरीरे । मे । रोमहर्षः । च । जायते ।
गाण्डीवम् । स्रंसते । हस्तात् । त्वक् । च । एव । परिदह्यते ॥

My body quivers and my hair stands on end. The bow Gāṇḍīva slips from my hand and my skin burns all over.

Chapter 1 v 35

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥

एतान् । न । हन्तुम् । इच्छामि । घ्नतः । अपि । मधुसूदन।
अपि । त्रै-लोक्य-राज्यस्य । हेतोः । किम् नु । मही-कृते ॥

‘These, O slayer of Madhu, I do not wish to kill, though they kill me, even for the sake of dominion over the three worlds; how much less for the sake of the earth!’

Chapter 2 v 9

संजय उवाच –
***Saṁjaya said:***

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः ।

न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥

Having spoken thus to Hṛṣīkeśa, Guḍākeśa, O tormentor of foes, said to Govinda,

'I will not fight,' and verily remained silent.

Chapter 2 v 30

श्री भगवानुवाच।
***The Blessed Lord said:***

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥

देही । नित्यम् । अवध्यः । अयम् । देहे । सर्वस्य । भारत ।
तस्मात् । सर्वाणि । भूतानि । न । त्वम् । शोचितुम् । अर्हसि ॥

'This embodied (Self) in the body of all, O Arjuna, can never be killed. Therefore you ought not to grieve over any being.'

Chapter 2 v 55

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥

प्रजहाति । यदा । कामान् । सर्वान् । पार्थ । मनस्-गतान् ।
आत्मनि । एव । आत्मना । तुष्टः । स्थित-प्रज्ञः । तदा । उच्यते ॥

‘When a man or woman, casts off all desires in the mind, (resting) in the Self, content with the Self alone, then they are said to be ‘one of steady knowledge.’

Chapter 2 v 71

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥

विहाय । कामान् । यः । सर्वान् । पुमान् । चरति । निःस्पृहः ।
निर्ममः । निरहङ्कारः । सः । शान्तिम् । अधिगच्छति ॥

That man attains peace, who, abandoning all desires, moves about without expectation, without sense of possession, without ego.

Chapter 3 v 9

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः ।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥

यज्ञ-अर्थात् । कर्मणः । अन्यत्र । लोकः । अयम् । कर्म-बन्धनः।
तत्-अर्थम् । कर्म । कौन्तेय । मुक्त-सङ्गः । समाचर ॥

‘Except in the case of action for sacrifice’s sake, this world is bound by action. Perform action for the sake of that ( i.e. sacrifice), O Arjuna, remaining free from attachment.’

Chapter 3 v 27

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते ॥

प्रकृतेः । क्रियमाणानि । गुणैः । कर्माणि । सर्वशः ।
अहङ्कार-विमूढ-त्मा । कर्ता । अहम् । इति । मन्यते ॥

‘Actions in all cases are being performed by the guṇas of Nature. He whose mind is deluded by egoism thinks ‘I am the doer.’

Chapter 4 v 8

परित्राम्णाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

परित्राम्णाय । साधूनाम् । विनाशाय । च । दुष्कृताम् ।
धर्म-संस्थापन-अर्थाय । सम्भवामि । युगे, युगे ॥

‘For the protection of the good, and for the destruction of evil-doers, for the establishment of the sacred law, I am born from age to age.’

Chapter *6 v 29*

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥

सर्व-भूत-स्थम् । आत्मानम् । सर्व-भूतानि । च । आत्मनि ।
ईक्षते । योग-युक्त-आत्मा । सर्वत्र । सम-दर्शनः ॥

‘His Self abiding in all beings, and all beings in His Self, (thus) he sees everywhere the same, that man whose mind is devoted to spirituality.’

Chapter *9 v 6*

यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान् ।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥

यथा । आकाश-स्थितः । नित्यम् । वायुः । सर्वत्र-गः । महान् ।
तथा । सर्वाणि । भूतानि । मत्-स्थानि । इति । उपधारय ॥

'Hold in mind that just as the mighty wind moving everywhere, yet rests ever in space, so all beings rest in Me.'

Chapter *9 v 17*

पिताऽहमस्य जगतो माता धाता पितामहः ।
वेद्यं पवित्रमोङ्कार ऋक् साम यजुरेव च ॥

पिता । अहम । अस्य । जगतः । माता । धाता । पितामहः ।
वेद्यम् । पवित्रम् । ओम्-कारः । ऋक्, सामः, यजुस् । एव । च॥

'I am the Father of this universe, its Mother, the Creator and Grandfather; I am what should be known, the Purifier, the sound 'ॐ,' and also The Three Vedas.'

Chapter *9 v 27*

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥

यत् । करोषि । यत् । अश्नासि । यत् । जुहोषि । ददासि । यत् ।
यत् । तपस्यसि । कौन्तेय । तत् । कुरुष्व । मत्-अर्पणम् ॥

'Whatsoever you do, whatsoever you eat, whatsoever you offer in sacrifice, whatsoever you give, whatsoever you perform as an austerity, that, O Arjuna, do as an offering to Me.'

Chapter 9 v 34

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥

मत्-मना । भव । मत्-भक्तः । मत्-याजी । माम् । नमस्कुरु ।
माम् । एव । एष्यसि । युक्त्वा । एवम् । आत्मानम् । मत्-परायणः ॥

'Fix your mind on Me, be devoted to Me, sacrifice to Me, bow down to Me. Thus united, with Me as your supreme goal, you will reach Me, your own Self.'

Chapter 10 v 20

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥

अहम् । आत्मा । गुडाक-ईश । सर्व-भूत-आशय-स्थितः ।
अहम् । आदिः । च । मध्यम् । च । भूतानाम् । अन्तः । एव । च ॥

'I am the Self, O Arjuna, seated in the heart of all beings; I am the beginning, the middle, and, indeed, the end of all beings.'

Chapter *12 v 13, 14*

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥
सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मे भक्तः स मे प्रियः ॥

अद्वेष्टा । सर्व-भूतानाम् । मैत्रः । करुण । एव । च ।
निर्ममः । निरहङ्कारः । सम-दुःख-सुखः । क्षमी ॥
सन्तुष्टः । सततम् । योगी । यत-आत्मा । दृढ-निश्चयः ।
मयि । अर्पित-मनस्-बुद्धिः । यः । मे । भक्तः । सः । मे । प्रियः ॥

He who hates no single being, who is friendly and compassionate to all, who is free from attachment and egoism, to whom pain and pleasure are equal, who is enduring, ever content and balanced in mind, self-controlled, and possessed of firm conviction, whose thought and reason are directed to Me, he who is (thus) devoted to Me is dear to Me.

Chapter 14  v 5

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥

सत्त्वम् । रजस् । तमस् । इति । गुणाः । प्रकृति-सम्भवाः ।
निबध्नन्ति । महा-बाहः । देहे । देहिनम् । अव्ययम् ॥

Sattva, Rajas, Tamas: these guṇas, O Thou of Mighty Arms, born of Nature, bind the imperishable embodied (Self) in the body.

Chapter 18  v 54

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥

ब्रह्म-भूतः । प्रसन्न-आत्मा । न । शोचति । न । काङ्क्षति ।
समः । सर्वेषु । भूतेषु । मत्-भक्तिम् । लभते । पराम् ॥

‘Becoming Brahman (Infinite Spirit), his heart serene, he neither grieves nor desires, the same to all beings; he attains supreme devotion to Me.’

<u>Chapter 18  v 73</u>

अर्जुन उवाच।
**Arjuna said:**

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत ।
स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥

नष्टः । मोहः । स्मृतिः । लब्धा । त्वत्-प्रसादात् । मया । अच्युत ।
स्थितः । अस्मि । गत-सन्देहः । करिष्ये । वचनम् । तव ॥

'Destroyed is my delusion, my memory is regained through Thy grace, O Kṛṣṇa . I am firm, my doubts gone. I will perform Thy word.'